# Nandikeshvarakashika or Nandikeshakashika

# નન્દિકેશ્વરકાશિકા અથવા નન્દિકેશકાશિકા

## Document Information

Text title : Nandikeshvarakashika or Nandikeshakashika

File name : nandikeshvarakAshikA.itx

Category : shiva

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Latest update : January 19, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 20, 2026

*sanskritdocuments.org*

# નન્દિકેશ્વરકાશિકા અથવા નન્દિકેશકાશિકા

॥ શ્રી શિવાય નમઃ ॥

નન્દિકેશ્વરકાશિકા અથવા નન્દિકેશકાશિકા

(નન્દિકેશ્વરપ્રમથપ્રણીતા)

નૃત્તાવસાને નટરાજરાજો નનાદ ઢક્કાં નવપઞ્ચવારમ્ ।
ઉદ્ધર્તુકામસ્સનકાદિસિદ્ધાનેતદ્વિમર્શે શિવસૂત્રજાલમ્ ॥ ૧॥

અત્ર સર્વત્ર સૂત્રેષુ હ્યન્ત્યં વર્ણં ચતુર્દશમ્ ।
ધાત્વર્થં સમુપાદિષ્ટં પાણિન્યાદીષ્ટસિદ્ધયે ॥ ૨॥

## ॥ અ ઇ ઉ ણ્ ॥ ૧॥

અકારો બ્રહ્મરૂપઃ સ્યાન્નિર્ગુણઃ સર્વવસ્તુષુ ।
ચિત્કલામ્ ઇં સમાશ્રિત્ય જગદ્રૂપ ઉણ્ ઈશ્વરઃ ॥ ૩॥

અકારઃ સર્વવર્ણાગ્ર્યઃ પ્રકાશઃ પરમેશ્વરઃ ।
આદ્યમન્ત્યેન સંયોગાત્ અહમિત્યેવ જાયતે ॥ ૪॥

સર્વં પરાત્મકં પૂર્વં જ્ઞપ્તિમાત્રમિદં જગત્ ।
જ્ઞપ્તેર્બભૂવ પશ્યન્તી મધ્યમા વાક્ તતઃ સ્મૃતા ॥ ૫॥

વક્ત્રે વિશુદ્ધચક્રાખ્યે વૈખરી સા મતા તતઃ ।
સૃષ્ટ્યાવિર્ભાવમાત્રાત્મા મધ્યમાવત્ સમાયુતમ્ ॥ ૬॥

અકારં સન્નિધીકૃત્ય જગતાં કારણત્વતઃ ।
ઇકારઃ સર્વવર્ણાનાં શક્તિત્વાત્ કારણં મતમ્ ॥ ૭॥

જગત્સ્રષ્ટુમભૂદ્વાઞ્છા (પ્રભોરિચ્છા) યદા હ્યાસીત્તદાઽભવત્ ।
કામબીજમિતિ પ્રાહુર્મુનયો વેદપારગાઃ ॥ ૮॥

અકારો જ્ઞપ્તિમાત્રં સ્યાત્ ઇકારશ્ચિત્કલા મતા ।

ઉકારો વિષ્ણુરિત્યાહુર્વ્યાપકત્વાન્મહેશ્વરઃ ॥ ૯॥

## ॥ ઋ ऌ ક્ ॥ ૨॥

ઋऌક્ સર્વેશ્વરો માયાં મનોવૃત્તિમદર્શયત્ ।
તામેવ વૃત્તિમાશ્રિત્ય જગદ્રૂપમજીજનત્ ॥ ૧૦॥

વૃત્તિવૃત્તિમતોરત્ર ભેદલેશો ન વિદ્યતે ।
ચન્દ્રચન્દ્રિકયોર્યદ્વત્ તથા વાગર્થયોરપિ ॥ ૧૧॥

સ્વેચ્છયા સ્વસ્ય ચિચ્છક્ત્યા વિશ્વમુન્મીલયત્યસૌ ।
વર્ણાનાં મધ્યમક્લીબમૃऌવર્ણદ્વયં વિદુઃ ॥ ૧૨॥

## ॥ એ ઓ ઙ્ ॥ ૩॥

એઓઙ્ માયેશ્વરાત્મૈક્યવિજ્ઞાનં સર્વવસ્તુષુ ।
સાક્ષિત્વાત્સર્વભૂતાનાં સ એક ઇતિ નિશ્ચિતમ્ ॥ ૧૩॥

## ॥ ઐ ઔ ચ્ ॥ ૪॥

ઐઔચ્ બ્રહ્મસ્વરૂપસ્સન્ જગત્સ્વાન્તર્ગતં તતઃ ।
ઇચ્છયા વિસ્તરં(વિસ્તૃતં) કર્ત્તુમાવિરાસીન્મહામુનિઃ(કૃપાનિધિઃ) ॥ ૧૪॥

## ॥ હ ય વ ર ટ્ ॥ ૫॥

ભૂતપઞ્ચકમેતસ્માત્ હયવરટ્ મહેશ્વરાત્ ।
વ્યોમવાય્વમ્બુવહ્ન્યાખ્યભૂતાન્યાસીત્સ એવ હિ ॥ ૧૫॥

હકારાત્ વ્યોમસંજ્ઞશ્ચ યકારાત્ વાયુરુચ્યતે ।
રકારાત્ વહ્નિસ્તોયં તુ વકારાત્ ઇતિ શૈવરાટ્ ॥ ૧૬॥

## ॥ લ ણ્ ॥ ૬॥

આધારભૂતં ભૂતાનામન્નાદીનાં ચ કારણમ્ ।
અન્નાદ્રેતસ્તતો જીવઃ કારણત્વાત્ લણ્ ઈરિતમ્ ॥ ૧૭॥

## ॥ ञ म ङ ण न म् ॥ ७॥

શબ્દસ્પર્શૌ રૂપરસગન્ધાશ્ચ ઞમઙણનમ્ ।
વ્યોમાદીનાં ગુણા હ્યેતે જાનીયાત્સર્વવસ્તુષુ ॥ ૧૮॥

## ॥ ઝ ભ ઞ્ ॥ ૮॥

વાક્પાણી ચ ઝભઞ્ આસીદ્વિરાડ્રૂપં ચિદાત્મનઃ ।
સર્વજન્તુષુ વિજ્ઞેયં સ્થાવરાદૌ ન વિદ્યતે ॥ ૧૯॥

## ॥ ઘ ઢ ધ ષ્ ॥ ૯॥

ઘઢધષ્ સર્વભૂતાનાં પાદપાયૂ ઉપસ્થકઃ ।
કર્મેન્દ્રિયગણા હ્યેતે જાતા હિ પરમાર્થતઃ ॥ ૨૦॥

## ॥ જ બ ગ ડ દ શ્ ॥ ૧૦॥

શ્રોત્રત્વઙ્નયનઘ્રાણજિહ્વાદીન્દ્રિયપઞ્ચકમ્ ।
સર્વેષામપિ જન્તૂનામીરિતં જબગડદશ્ ॥ ૨૧॥

## ॥ ખ ફ છ ઠ થ ચ ટ ત વ્ ॥ ૧૧॥

પ્રાણાદિપઞ્ચકં ચૈવ મનો બુદ્ધિરહઙ્કૃતિઃ ।
બભૂવ કારણત્વેન ખફછઠથચટતવ્ ॥ ૨૨॥

વર્ગદ્વિતીયવર્ણોત્થાઃ પ્રાણાદ્યાઃ પઞ્ચવાયવઃ ।
મધ્યવર્ગત્રયાજ્જાતા અન્તઃકરણવૃત્તયઃ ॥ ૨૩॥

## ॥ ક પ ય્ ॥ ૧૨॥

પ્રકૃતિં પુરુષઞ્ચૈવ સર્વેષામેવ સમ્મતમ્ ।
સમ્ભૂતમિતિ વિજ્ઞેયં કપય્ સ્યાદિતિ નિશ્ચિતમ્ ॥ ૨૪॥

## ॥ શ ષ સ ર્ ॥ ૧૩॥

સત્ત્વં રજસ્તમ ઇતિ ગુણાનાં ત્રિતયં પુરા ।
સમાશ્રિત્ય મહાદેવઃ શષસર્ ક્રીડતિ પ્રભુઃ ॥ ૨૫॥

શકારત્ રજસોદ્ભૂતિઃ ષકારત્ તમસોદ્ભવઃ ।
સકારાત્ સત્ત્વસમ્ભૂતિરિતિ ત્રિગુણસમ્ભવઃ ॥ ૨૬॥

## ॥ હ લ્ ॥ ૧૪॥

તત્ત્વાતીતઃ પરં સાક્ષી સર્વાનુગ્રહવિગ્રહઃ ।
અહમાત્મા પરો હલ્ સ્યાદિતિ શમ્ભુસ્તિરોદધે ॥ ૨૭॥

॥ ઇતિ નન્દિકેશ્વરકૃતા કાશિકા સમ્પૂર્ણા ॥

॥ ઇતિ શિવમ્ ॥

Notes:
NandikeśvaraKāśikā નન્દિકેશ્વરકાશિકા; ascribed to Nandi નન્દિ, is a cosmogonical interpretation of the MāheśvaraSutrāṇi / ŚivaSūtrāṇi માહેશ્વરસૂત્રાણિ / શિવસૂત્રાણિ that comprise of 14 cryptic verses composed of the Sound Sequences that emanated from the Ḍamaru ડમરુ of Śiva Naṭarāja શિવ નટરાજ, revealed as Saṃskṛta phonemes સંસ્કૃત વર્ણ to Ṛṣi Pāṇini ઋષિ પાણિનિ forming the basis of his work on Saṃskṛta grammar known as Aṣṭādhyāyī અષ્ટાધ્યાયી.

॥ માહેશ્વરસૂત્રાણિ ॥

૧. અ ઇ ઉ ણ્ ।
૨. ઋ ૡ ક્ ।
૩. એ ઓ ઙ્ ।
૪. ઐ ઔ ચ્ ।
૫. હ ય વ ર ટ્ ।
૬. લ ણ્ ।
૭. ઞ મ ઙ ણ ન મ્ ।
૮. ઝ ભ ઞ્ ।
૯. ઘ ઢ ધ ષ્ ।
૧૦. જ બ ગ ડ દ શ્ ।

૧૧. ખ ફ છ ઠ થ ચ ટ ત વ્ ।

૧૨. ક પ ય્ ।

૧૩. શ ષ સ ર્ ।

૧૪. હ લ્ ।

MāheśvaraSutrāṇi

1. a i u ṇ

2. ṛ ḷ k

3. e o ṅ

4. ai au c

5. ha ya va ra ṭ

6. la ṇ

7. ña ma ṅa ṇa na m

8. jha bha ñ

9. gha ḍha dha ṣ

10. ja ba ga ḍa da ś

11. kha pha cha ṭha tha ca ṭa ta v

12. ka pa y

13. śa ṣa sa r

14. ha l

Encoded and proofread by Ruma Dewan

*Nandikeshvarakashika or Nandikeshakashika*

pdf was typeset on January 20, 2026

Please send corrections to *sanskrit@cheerful.com*